# <u>Guduci</u> <u>अमृता</u>

**तिक्ताऽमृता त्रिदोषघ्नी ग्राहिण्युष्णा रसायनी ।**
**दीपनी ज्वरतृड्दाहकामलारक्तवातनुत् ॥ (Mdn)**

Amrta is tikta in rasa, usna in veerya, grahi, rasayani, dipani, tridoshaghna, cures jvara, trt, daha, kamala and raktavata.

**गुडूची कटुका तिक्ता स्वादुपाका रसायनी ।**
**संग्राहिणी कषायोष्णा लघ्वी बल्याग्निदापनी ॥**
**दोषत्रयामतृड्दाहमेहकासांश्च पाण्डुताम् ।**
**कामलाकुष्ठवातास्रज्वरकृमिवमीर्हरेत् ॥ (Bpn)**

Guduci is katuka, tikta, kashaya in rasa, laghu in guna, usna in veerya, svadu in paka, rasayani, sangrahani, balya, agni dipani, cures tridosha, ama, trt, daha, meha, kasa, pandu, kamala, kustha, vata asra, jvara, krmi and vami.

**गुडूची स्वरसे तिक्ता कषायोष्णा गुरुस्तथा ।**
**त्रिदोषजन्तुरक्तार्शःकुष्ठज्वरहरा परा ॥**

**गुडूच्यायुष्प्रदा मेध्या तिक्ता संग्राहिणी बला ।**
**ज्वरतृड्पाण्डुवातासृक्छर्दिमेहादोषजित् ॥**
**गुडूची कफवातघ्नी पित्तमेदोविशोषिणी ।**
**रक्तवातप्रशमनी कण्डूवीसर्पनीशिनी ॥**
**कन्दोद्भवा गुडूची च कटुष्णा सन्निपातहा ।**
**विषघ्नी ज्वरभूतघ्नी वलीपलितनाशिनी ॥ (Dhn)**

Guduci svarasa is tikta, kashaya in rasa, usna in veerya, guru in guna, cures tridosha, jantu, rakta arsas, kustha and jvara.

Guduci is tikta in rasa, ayushya, medhya, sangrahi, balya, cures jvara, trt, pandu, vata asrk, chardi, meha, tridosha. It is kapha vataghna, pitta meda visoshani, rakta vata prasamani, kandu-visarpa nasini.
Kanda is katu in rasa, usna in veerya, sannipata hara, vishaghna, jvara bhutaghna, vali palita nasani.

**ज्ञेया गुडूची गुरुरुष्णवीर्या**
**तिक्ता कषाया ज्वरनाशिनी च ।**
**दाहार्त्तितृष्णावमिरक्तवात**
**प्रमेहपाण्डुभ्रमहारिणी च ॥**
**कन्दोद्भवा गुडूची च कटूष्णा सन्निपातहा ।**
**विषघ्नी ज्वरभूतघ्नी वलीपलितनाशिनी ॥ (Rjn)**

Guduci is tikta, kashaya in rasa, guru in guna, usna in veerya, jvara nasani, cures daha, trsna, vami, raktavata, prameha, pandu, bhrama. Kanda of guduci is katu in rasa, usna in veerya, sannipata hara, cures visha, jvara, bhuta, vali and palita.

**गुडूची तुवरी तिक्ता वीर्ये चोष्णा ।**
**ग्राहि रसायनी बल्या मधुरा चाग्निदीपनी ॥**
**लघ्वी हृद्याऽऽयुःप्रदा च ज्वरदाहतृषाहरी ।**
**रक्तदोषं वमां वातं भ्रमं पाण्डुं प्रमेहकम् ॥**
**त्रिदोषं कमिलां चामं कासं कुष्ठं तथा कृमीन् ।**
**रक्तार्शं वातरक्तं च कण्डूं मेदं विसर्पकम् ॥**

**पित्तं कफं नाशयति घृतेन सह वातहा ।**
**गुडेन बद्धविट्कत्वं सितया पित्तनाशिका ॥**

मधुना कफहा प्रोक्ता वातवातारितैलिके ।
शुण्ठ्याऽऽमवातशमनी मुनिभिः परिकीर्त्तिता ॥

गुडूची पर्णशाका तु तुवरोष्णा लघु स्मृता ।
कटुस्तिक्ता पाककाले मधुरा च रसायनी ॥
अग्निदीप्तिकरी बल्या ग्राहिणी च त्रदोषहा ।
वातरक्तं तृषा दाहं मेहं कुष्ठञ्च कामलाम् ॥
पाण्डुरोगं नाशयतीत्येवमाचार्यभाषितम् । **(Nir)**

Guduci is tuvara, tikta, madhura in rasa, laghu in guna, usna in veerya, grahi, rasayani, balya, agni dipani, hrdya, ayuprada, cures jvara, daha, trsa, raktadosha, vami, vata, bhrama, pandu, prameha, tridosha, kamala, ama, kasa, kustha, krmi, rakta arsa, vata rakta, kandu, meda, visarpa, pitta, kapha.

Along with ghrta it cures vata; along with guda it is baddha vita nasana, sita it is pitta hara, madhu it is kapha hara, along with vataghna taila it is vata hara; along with sunthi it is amavata hara.

Guduci parna sakha is tuvara, katu, tikta in rasa, usna in veerya, laghu in guna, madhura in paka, rasayani, agni dipti karaka, balya, grahini, tridosha hara, cures vatarakta, trsa, daha, meha, kustha, kamala, pandu.

गुडूचिसत्वं सुस्वादु पथ्यं लघु च दीपनम् ।
चक्षुष्यं धातुकृन्मेध्यं वयःस्थापनकारकम् ॥
वातरक्तं त्रिदोषं च पाण्डुं तीव्रज्वरं तथा ।
वमिं जीर्णज्वरं पित्तं कामलां च प्रमेहकम् ॥
अरुचिं श्वासकासौ च हिक्कां चार्शःक्षयं तथा ।
सदाहं मूत्रकृच्छ्रं च प्रदरं सोमरोगकम् ।
नाशयेदिति संप्रोक्तं पित्तं मेहं सशर्करम् ॥ **(Rjn)**

Guduci satva is svadu, laghu in guna, pathya, dipana, caksushya, dhatu karaka, medhya, vayasthapana karaka, cures vatarakta, tridosha, pandu,

tivra jvara, vami, jirna jvara, pitta, kamala, prameha, aruci, svasa, kasa, hikka, arsa, ksaya, daha, mutrakrcchra, pradara, soma roga, pitta, meha and sarkara.

**गुडूची ग्राहिणी बल्या त्रिदोषघ्नी रसायनी ।**
**दीपनी ज्वरतृड्छर्दिकामलावापित्तनुत् ।। (Rav)**

Guduci is grahi, balya, tridoshaghna, rasayani, dipani, cures jvara, trt, chardi, kamala and is vata pitta hara.

**गुडूची मधुरा पाके कषाया कटुका लघुः ।**
**तिक्ता संग्राहिणी हृद्या बल्योष्णा वह्निकृज्जयेत् ।।**
**दोषकुष्ठकृमिच्छर्दिदाहवातास्रपाण्डुताः ।**
**ज्वरामकामलामेहतृष्णाकासान् रसायनी ।। (Kdn)**

Guduci is kashaya, katuka, tikta in rasa, laghu in guna, usna in veerya, madhura in paka, sangrahini, hrdya, balya, vahni karaka, cures doshas, kustha, krmi, chardi, daha, vata asra, pandu, jvara, ama, kamala, meha, trsna, kasa and is rasayana.